# हाईस्कूल परीक्षा 2013–14

## प्रश्नपत्र

## संस्कृत सामान्य

**समय : 3 घण्टे** **पूर्णांक : 100**

**(1) सर्वेप्रश्नाः अनिवार्याः सन्ति।**

(2) प्रश्नानां सम्मुखे अंकाः प्रदत्ताः।

1. उचितविकल्पं चित्वा लिखत।

**(अ)** 'विद्या+आलयः' इत्यस्य सन्धिः अस्ति–

(i) विद्याआलयः (ii) विद्यलयः

(iii) विद्यालयः (iv) विद्यअलयः

**(ब)** 'हरेऽव' इत्यस्मिन् पदे सन्धिः अस्ति–

(i) दीर्घस्वरसन्धि (ii) पूर्वरूपस्वर सन्धिः

(iii) गुण स्वर सन्धिः (iv) यण्स्वर सन्धिः

**(स)** विसर्गसन्धेः उदाहरणम् अस्ति–

(i) नमस्ते (ii) रमेशः

(iii) जगदीशः (iv) नयनम्

**(द)** 'जगदीशः' इत्यस्य सन्धिविच्छेदः अस्ति–

(i) जग+दीशः (ii) जगदि+ईशः

(iii) जगदी+ईशः (iv) जगत्+ईशः

**(ई)** 'केयूराः' पुरूषं न विभूषयन्ति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति–

(i) केयूराः (ii) पुरूषं

(iii) न (iv) विभूषयन्ति

2. **(अ)** ''पितरौ'' इत्यस्य पदस्य समासविग्रहः अस्ति–

(i) माता–पिता (ii) माता च पिता च

(iii) माता पिता च (iv) च माता पिता

(ब) ''द्विगुसमासस्य'' उदाहरणम् अस्ति–

(i) प्रतिदिनम् (ii) त्रिभुवनम्

(iii) हरिहरौ (iv) धनश्यामः

(स) 'राजपुरूषः' इत्यस्मिन् पदे समासः अस्ति–

(i) तत्पुरूषसमासः (ii) बहुब्रीहिसमासः

(iii) द्वन्द्वसमासः (iv) अव्ययीभावसमासः

(द) अधोलिखितेषु 'प्र' उपसर्गः अस्ति–

(i) प्रतिवादः (ii) प्रतिध्वनिः

(iii) प्राचार्यः (iv) परिक्रमा

(इ) अधोलिखितेषु उपसर्गः नास्ति–

(i) सु (ii) अप

(iii) प्र (iv) भू

3. (अ) 'नेष्यति' इत्यस्मिन् पदे लकारः अस्ति–

(i) लट्लकारः (ii) लृटलकारः

(iii) लङलकार (iv) लोट्लकारः

(ब) 'अपठत्' इत्यस्मिन् पदे धातुः अस्ति–

(i) पठ् (ii) पा

(iii) पच् (iv) अस्

(स) 'गच्छामि' पदे पुरूषः अस्ति–

(i) प्रथम पुरूषः (ii) मध्यम पुरूषः

(iii) उत्तम पुरूष (iv) कोऽपि नास्ति

**(द)** 'भवन्तु' इत्यस्मिन् पदे वचनम् अस्ति–

(i) एकवचनम् (ii) द्विवचनम्

(iii) बहुवचनम्

**(इ)** अधोलिखितेषु अव्ययम् नास्ति–

(i) अपि (ii) अस्ति

(iii) तत्र (iv) कदा

4. **(अ)** 'क्रीडित्वा' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(i) क्तवतु (ii) क्त्वा

(iii) क्त (iv) तुमुन्

**(ब)** 'अजा' पदे प्रत्ययः अस्ति–

(i) टाप् (ii) ङीप्

(iii)ठक् (iv) त्रल्

**(स)** 'पठ्+तुमुन्' इत्यस्य पदम् भविष्यति–

(i) पठतुम् (ii) पठितम्

(iii) पठितुम् (iv) पठतुमुन्

**(द)** 'गुण+मतुप्' इत्यस्य पदं भविष्यति–

(i) गणुवान् (ii) गुणिनी

(iii) गुणी (iv) गुणमत्

**(इ)** 'परसदननिविष्टः को लघुत्वं न याति' इत्यस्मिन् सूक्तेः प्रत्ययपदं चित्वालिखत्

(i) परसदन् (ii) लघुत्वं

(iii) न (iv) याति

**5. प्रदत्त शब्दैः रिक्तस्थानानि पूरयत –**

(परोपकारः, भवानी, मनः, पापेऽपि, श्रेष्ठः)

(अ) तन्मे ........... शिवसडकल्पमस्तु।

(ब) ज्येष्ठः ........ कुले लोके।

(स) न .......... पापीस्यात्।

(द) शिववीरः तस्मै ........... इतिनामकं कृपाणं समर्पितवान्।

(इ) ................ कर्तव्यः प्राणैः कण्ठगतैरपि।

**6. अधोलिखितेषु त्रयाणां प्रश्नानाम् उत्तराणि एकवाक्येन संस्कृतभाषायां लिखत।**

(अ) विदिशानगरी कस्मिन् प्रदेशे स्थिता विद्यते ?

(ब) सर्वप्राचीनाभाषा का अस्ति ?

(स) सर्वैः कस्य निर्णयः स्वीकृतः?

(द) कृषीवलैः काः समेधिताः भवन्तु?

7. **(अ)** अधोलिखितेषु शब्दरूपद्वयं चित्वा त्रिषु वचनेषु लिखत –

(i) रमा – पंचमी विभक्तिः

(ii) राजन् – द्वितीया विभक्तिः

(iii) साधु – तृतीयाविभक्तिः

(iv) अस्मद् – षष्ठी विभक्तिः

8. 'तस्मे' अथवा 'मम' इति पदस्य वचनं विभक्तिश्च लिखतः ?

9. अधोलिखितेषु गद्यांशद्वयं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

**(अ)** वरूणदेवः वृष्टि वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति। भूमाता वृक्षस्य आधारभूता लं अस्ति। वायुः अनि ददाति। ते सर्ववृक्षं पालयन्ति पोषयन्ति रक्षन्ति च। ते न कदापि 'ममअधिकारः वर्तते' इति अवदन्। ते सर्वे परोपकारणिः। परं यूयं सर्वे परोपकारिणः वृक्षस्य साहाय्यं स्वीकृत्य तमेव नाशयितुं कृतसंकपा यूयं स्वाश्रयमेव नाशयथ। अस्मिन् वृक्षे छिन्ने सति यूयं कृत्र गमिष्य ?

(i) कः वृष्टिं वर्षति ?

(ii) सूर्यदेवः किम् प्रयच्छति ?

(iii) का वृक्षस्य आधारभूता अस्ति ?

(iv) के परोपकारिणः ?

(v) 'वृक्षस्य' पदे का विभक्तिः अस्ति ?

**(ब)** मनुष्यः सदानीरोगः भवेत्। अतएव स्वस्थ शरीरार्थ बहवः उपायाः वर्णिताः सन्ति। वैधकशास्त्रम् आरोग्यशास्त्रम अपि कथ्यते। स्वास्थ्यघातकाः ये राजरोगादयः सन्ति। तेषां सर्वथा शमनाय द्विसप्ततिविधाः चिकित्साः करणीयाः।

(i) मनुष्यः सदा कीदृशः भवेत् ?

(ii) स्वस्थशरीरार्थं कति उपायाः वर्णिताः सन्ति ?

(iii) वैधकशास्त्रस्य अपरं नामकिम् अस्ति ?

(iv) 'नीरोगः' इति पदस्य विपरीतार्थी पदं लिखत ?

(v) 'राजरोगादयः' इत्यस्य पदस्य सन्धिविच्छेदः कुरु ?

(स) 'बुन्देलकेसरी' इति विख्यातस्य छत्रसालस्य जन्म (1649) एकोनपंचाशदुत्तर षोडशशततमे ईस्वीये मध्यप्रदेशस्य 'टीकमगढ़' जनपदस्य मयूर पर्वतीय क्षेत्रे वर्तमान लिधौरा विकास खण्डे 'ककर कचनयग्रामे' अभवत्। छत्रसालस्य मातुर्नामः सारन्धादेवी पितुर्नाम च श्री चम्पतरायः इत्यासीत्। अयं वीरः बाल्यकालादेव भारतमातरं मुगलशासनात् विमोक्तुं प्रयतते स्म।

(i) 'बुन्देलकेसरी' इति कः विख्यातः आसीत् ?

(ii) छत्रसालस्य जन्म कदा अभवत् ?

(iii) मध्यप्रदेशस्य कस्मिन् ग्रामे छत्रसालस्य जन्म अभवत् ?

(iv) 'इत्यासीत' शब्दस्य सन्धिविच्छेदः कुरू ?

(v) 'मुगलशासनात्' पदे का विभक्तिः अस्ति ?

10. अधोलिखित पद्यांशानि पठित्वा संस्कृत भाषायाम् प्रश्नानाम् उत्तराणि लिखत **(केंचित द्वे)**

(अ) गंगा पापं शशीतापं दैन्ये कल्पतरूस्तथा।
पापं तापं च दैन्यं च ध्नन्ति सन्तोमहाशयाः।।

(i) का पापं हन्ति ?

(ii) शशी किम् करोति ?

(iii) दैन्यं कः हन्ति ?

(iv) 'पापम्' इति शब्दस्य 'विलोम पदं' लिखत ?

(v) 'महाशयाः' शब्दस्य वचनं लिखत् ?

(ब) घनोपगूढ़ं गगनं नतारा, न भास्करो दर्शनमभ्युपैति।
न वैर्जलौघैर्धरणी वितृप्ता, तमोविलिप्ता न दिशः प्रकाशाः ।।

(i) घनोपगूढ़ं किम् ?

(ii) तारा भास्करः च किम् न अभ्युपैति ?

(iii) धरणी कैः वितृप्ता ?

(iv) तमोविलिप्ता काः न प्रकाशाः ?

(v) 'घनोपगूढ़ं' पदस्य सन्धिविच्छेदम् लिखत् ?

(स) दरिद्रता धीरतया विराजते, कु वस्त्रता शुभ्रतया विराजते ।

कदन्नता चोष्णतया विराजते, कुरूपता शीलतया विराजते।।

(i) दरिद्रता कयाविराजयते ?

(ii) का शुभ्रतया विराजते ?

(iii) कदन्नता कयाविराजते ?

(iv) कुरूपता कयाविराजते ?

(i) 'शुभ्रतया' शब्दे का विभक्तिः अस्ति ?

**11. युग्म मेलनं कुरूत–**

| "अ" | | "ब" |
|---|---|---|
| (i) प्रकृतिदत्तः वरः | 1 | मदो मे व्यपगतः |
| (ii) ज्वरइव | 2 | वेदव्यासः |
| (iii) द्विजश्रेष्ठः | 3 | वृक्षः |
| (iv) महाभारतम् | 4 | वृद्धः |
| | 5 | कालः |

12. शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं न इति लिखत–

(अ) शुद्धोधनः राहुलस्य पिता आसीत्।

(ब) छिन्न : चन्दनतरूः गन्धं जहाति।

(स) माता दैवतानां दैवतम् नास्ति।

(द) ब्राम्हणी पतिमात्रधर्मिणीं आसीत्।

**13. अधोलिखितेषु चतुर्णाम् प्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(अ) महर्षिः कस्य स्थापनां कृतवान ?

(ब) रथकारस्य नाम किम् आसीत् ?

(स) देवदुर्लभम् किम् ?

(द) वरतन्तु शिष्यः कः आसीत् ?

(इ) वासुदेवः कस्य प्रियशिष्यः आसीत् ?

14. प्रश्नपत्रे समागतान श्लोकान विहाय स्वपाठ्य पुस्तकात्सुभाषितद्वयं लिखत।

15. स्व प्राचार्यस्य कृते अवकाशार्थम् प्रार्थनापत्रं संस्कृत भाषायाम् लिखत।

अथवा

स्वपुत्रस्य जन्मदिवसोत्सवे आमन्त्रणाय मित्रं प्रति आमन्त्रणम् पत्रम् संस्कृतभाषायम लिखत।

16. अधोलिखितेषु पंच अशुद्ध कारक वाक्यानां शुद्धिः करणीया।

(अ) ग्रामस्य परितः वृक्षाः सन्ति।

(ब) बालकः अश्वेन पतति।

(स) सर्वेबालकाः धावति।

(द) श्रीकृष्णः नमः।

(इ) सीता रामस्य सह वनम् अगच्छत्।

(य) बालकः कन्दुकम् क्रीडति।

17. अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजनं कुरूत–

(अ) शिष्यः अनन्तरं रामनाथपुरं प्रस्थितवान्।

(ब) मया रामदेवस्य जीवनम् एव अनुसरणीयम्।

(स) गंगातीरे मार्कडेयः नाम कश्चनमुनिः वसतिस्म।

(द) ततः वासुदेवः रामनाथपुरम् प्राप्य रामदेवस्य गृहम् अगच्छत्।

(इ) वासुदेवः तस्य प्रियशिष्यः आसीत्।

18. अधोलिखितम् अपठितगद्यांशं सम्यक पठित्वा प्रश्नानाम् उत्तराणि लिखत।

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। जन्मभूमिः स्वर्गात् उत्कृष्टतरा अस्ति। सा लोकानां शरणदायिनी विविधखाद्यपदार्थ प्रदायिनी सर्वव्यवहाराणं लीलभूमिः च अस्ति। वैदिक ऋषिः कथयति–माता भूमि पुत्रोऽहं पृथिव्याः। वयं राष्ट्रभावां राष्ट्रीययचरित्रं त्यागभावनां बिना राष्ट्रस्य संरक्षण कर्तुम् न पारायामः। परस्परैक्यभावनां बिना राष्ट्रं कदापि समृद्धंन भवति। अतः अस्माभिः स्वार्थम् परित्यज्य देशस्य देशवासिनां च सेवां सततं करणीया।

(i) अस्यगद्यांशस्य शीर्षकं लिखत ?

(ii) जन्मभूमिः कस्मात् गरीयसी ?

(iii) माताभूमिः इति कः कथयति ?

(iv) स्वार्गात्' शब्दे का विभक्तिः अस्ति ?

(v)'पुत्रोऽहं' इति पदस्य सन्धिविच्छेदः लिखत् ?

19. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायाम् निबंधं लिखत।

(अ) संस्कृतभाषायाः महत्वम्

(ब) महाकविः कालिदासः

(स) सदाचारः

(द) उत्सवः

– – x x – –

# हाईस्कूल परीक्षा 2013–14

## आदर्श उत्तर

## संस्कृत सामान्य

समय : 3 घण्टे पूर्णांक : 100

1. (अ) (iii) विद्यालयः
   (ब) (ii) पूर्वरूपस्वरसंधिः
   (स) (i) नमस्ते
   (द) (iv) जगत्+ईशः
   (इ) (iii) न

2. (अ) (ii) माता च पिता च
   (ब) (ii) त्रिभुवनम्
   (स) (i) तत्पुरूषसमासः
   (द) (iii) प्राचार्यः
   (इ) (iv) भू

3. (अ) (ii) लृट्लकारः
   (ब) (i) पठ्
   (स) (iii) उत्तमपुरूषः
   (द) (iii) बहुवचनम्
   (इ) (ii) अस्ति

4. (अ) (ii) क्त्वा
   (ब) (i) टाप्
   (स) (iii) पठितुम्
   (द) (i) गुणवान्
   (इ) (ii) लघुत्वं

5. (अ) मनः

(ब) श्रेष्ठः

(स) पापेऽपि

(द) भवानी

(इ) परोपकारः

6. (अ) विदिशानगरी मध्यप्रदेशे स्थिता विद्यते।

(ब) सर्व प्राचीनाभाषा संस्कृतभाषा अस्ति।

(स) सर्वैः अजापुत्रस्य निर्णयः स्वीकृतः।

(द) कृषीबलैः धान्यवृद्धयः समेधिताः भवन्तु।

7. (i) रमायाः रमाभ्याम् रमाभ्यः

(ii) राजानम् राजानौ राज्ञः

(iii) साधुना साधुभ्याम् साधुभिः

(iv) मम, मे आवयोः, नौ अस्माकम्, नः

8. वचनं – एकवचनम्

विभक्तिः – चतुर्थी

अथवा

वचनं–एकवचनम्, विभक्तिः – षष्ठी

9.(अ)

(i) वरूणदेवः वृष्टिं वर्षति।

(ii) सूर्यदेवः प्रकाशं प्रयच्छति।

(iii) भूमाता वृक्षस्य आधारभूता अस्ति।

(iv) वरूणदेवः सूर्यदेवः, भूमाता, वायुदेवश्च परोपकारिणः।

(v) षष्ठी विभक्तिः।

(ब) (i) मनुष्यः सदानीरोगः भवेत्।

(ii) स्वस्थशरीरार्थं द्विसप्ततिविधाः उपायाः वर्णिताः सन्ति।

(iii) वैद्यकशास्त्रस्य अपरं नाम आरोग्यशास्त्रम अस्ति।

(iv) रोगः।

(v) राजरोग+ आदयः।

(स)

(i) 'बुन्देलकेसरी' इति छत्रसालः विख्यातः अस्ति।

(ii) छत्रसालस्य जन्म एकोन पंचाशदुत्तरषोडशशततमे ईस्वीये (1649) अभवत्।

(iii) मध्यप्रदेशस्य ककरकचनयग्रामे छत्रसालस्य जन्म अभवत्।

(iv) इति+आसीत्

(v) पंचमी विभक्तिः।

10.(अ)

(i) गंगा पापं हन्ति।

(ii) शशी तापं दूरी करोति।

(iii) दैन्यं कल्पतरूः हन्ति।

(vi) पुण्यम्।

(v) बहुवचनम्।

(ब)

(i) घनोपगूढ़ं गगनम्।

(ii) तारा भास्करः च दर्शनम् न अभ्युपैति।

(iii) धरणी नवैर्जलौघैः वितृप्ता।

(iv) तमोविलिप्ताः दिशाः न प्रकाशाः।

(v) घन + उपगूढ़ं।

(स)

(i) दरिद्रता धीरतया विराजते।

(ii) कुवस्त्रता शुभ्रतया विराजते।

(iii) कदन्नता चोष्णतया विराजते।

(iv) कुरूपता शीलतया विराजते।

(v) तृतीया विभक्तिः।

11.

| "अ" | "ब" |
| --- | --- |
| (i) प्रकृतिदत्तः वरः | वृक्षः |
| (ii) ज्वरइव | मदो मे व्यपगतः |
| (iii) द्विजश्रेष्ठः | वृद्धः |
| (iv) महाभारतम् | वेदव्यासः |

12.

(अ) न

(ब) न

(स) न

(द) आम्

13.

(अ) आर्यसमाजस्य।

(ब) उज्ज्वलकः।

(स) मानवशरीरम्।

(द) कौत्सः।

(इ) मार्कण्डेयस्य।

14. स्वविवेकानुसारं स्वपाठ्यपुस्तकात् कोऽपि शुद्ध सुभाषितद्वयं लेखने अंका प्रदेयाः।

15. स्वविवेकानुसारं पत्रे संकेतं सम्बोधनं दिनांक विषयं भाषादिकं च दृष्ट्वा शुद्ध पत्रस्य कृते चत्वारः अंकाः प्रदानीयाः।

16.

(अ) ग्रामम् परितः वृक्षाः सन्ति।

(ब) बालकः अश्वात् पतति।

(स) सर्वे बालकाः धावन्ति।

(द) श्री कृष्णाय नमः।

(इ) सीता रामेण सह वनम् अगच्छत्।

(य) बालकः कन्दुकेन क्रीडति।

17.

(स) गंगातीरे मार्कण्डेय नाम कश्चन मुनिः वसति स्म।

(इ) वासुदेवः तस्य प्रियशिष्यः आसीत्।

(अ) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान्।

(द) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम अगच्छत।

(ब) मया रामदेवस्य जीवनम् एव अनुसरणीयम्।

18.

(i) अस्य गद्यांशस्य शीर्षक ''जन्मभूमिः अस्ति।

(ii) जन्मभूमिः स्वर्गात् गरीयसी।

(iii) माताभूमिः इति वैदिक ऋषिः कथयति।

(iv) पंचमी विभक्तिः।

(v) पुत्रो+अहं।

19. सम्पूर्णशुद्धनिबन्धस्य कृते दशअंकाः निर्धारिताः।

– – X X – –